# ॥ श्री कृष्ण स्तुति (अक्रूर कृत) ॥

नम: श्रीकृष्णचन्द्राय परिपूर्णतमाय च ।

असंख्याण्डाधिपतये गोलोकपतये नम: ॥१॥

श्रीराधापतये तुभ्यं व्रजाधीशाय ते नम:।

नम: श्रीनन्दपुत्राय यशोदानन्दनाय च ॥२॥

देवकीसुत गोविन्द वासुदेव जगत्पते ।

यदूत्तम जगन्नाथ पाहि मां पुरुषोत्तम ॥३॥

वाणी सदा ते गुणवर्णने स्यात्।

कर्णौ कथायां ममदोश्च कर्मणि ।

मन: सदा त्वच्चरणारविन्दयो।

दृशौ स्फुरद्धामविशेषदर्शने ॥४॥

॥ इति श्रीगर्गसंहितायां मथुराखण्डे अक्रूरकृतश्रीकृष्णस्तुतिः ॥

paramsoul.com